শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমদ্বেঙ্কটশেষার্যানুগৃহীতং

# ॥ শ্রীকোদণ্ডপাণিসুপ্রভাতম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীকোদণ্ডপাণিসুপ্রভাতম্ ॥

ৱন্দে ৱেঙ্কটশেষার্যং ৱৎসৱংশশিরোমণিম্।
ৱাৎস্যশ্রীৱরদাচার্যতনযং করুণানিধিম্॥

শ্রীরামচন্দ্র করুণাৱরুণালয শ্রী
সীতামুখাম্বুজৱিকাসক বালসূর্য !।
সৌমিত্রিমিত্র ! ভরতাভিরতাপ্তমিত্র !
শত্রুঘ্ন হে ! রঘুপতে ! তৱ সুপ্রভাতম্॥ **1** ॥

ভাস্বানুদেতি ৱিকচানি সরোরুহাণি
পশ্য স্মরন্ মধুরকূজিতষডপদানি।
ৎৱদ্বীক্ষণোন্মিষিতনাভিসরোজৱেধোঃ
ৱেদধ্ৱনেঃ রঘুপতে ! তৱ সুপ্রভাতম্॥ **2** ॥

ৎৱাং বোধযন্তি পরিতঃ শ্রুতযঃ শ্রুতীনাং
সারেণ সানুজ ! ভৱৎপ্রতিবোধকেন।
শ্লোকেন কৌশিকমুখোদ্গলিতেন কর্ণ -
পীযূষৱদ্রঘুপতে ! তৱ সুপ্রভাতম্॥ **3** ॥

ৎৱাং বোধযন্তি ৱিবুধাঃ শ্রুতিভোগ্যৱেণু -
ৱীণামৃদঙ্গপণৱাদিততানুৱাদৈঃ।
স্তোত্রৈর্ধরাসুরৱরস্তুতিঘোষমিত্রৈঃ
আকর্ণ্যতাং রঘুপতে ! তৱ সুপ্রভাতম্॥ **4** ॥

উদ্যানৱাসরসিকাঃ শুকশারিকাদ্যাঃ
    হৃদ্যা হরেহরিরিতি দ্বিজঘোষহৃদ্যৈঃ।
হৃদ্যাং মুদং ৱিদধতীহ তৱাপদান -
    পদ্যৈর্দ্বিজাঃ রঘুপতে ! তৱ সুপ্রভাতম্॥ **5**॥

ব্রহ্মা শিৱশ্শতমখশ্চ মখাশনৌঘৈঃ
    ৎৱদ্ধাম গোপুরভুৱি প্রতিপালযন্তি।
ৎৱৎপাদপঙ্কজসিষেৱিষৱোঽৱিশেষং
    ভক্তৈর্দ্বিজৈ রঘুপতে ! তৱ সুপ্রভাতম্॥ **6**॥

সূর্যেন্দুসন্নিধিৱশাদিৱ দেৱসঙ্ঘৈঃ
    সোৎফুল্লৱক্ত্রকমলাঞ্জলিকুড্মলৌকৈঃ।
মন্দারসুন্দরকরৈঃ প্রতিপাল্যতের্চা -
    বদ্ধাদরৈঃ রঘুপতে ! তৱ সুপ্রভাতম্॥ **7**॥

তীর্থাভিষেকপরিশুদ্ধধিযোঽর্চকাস্তে
    পূর্ণাভিষেককলশাঃ পরিচারকাশ্চ।
স্তুৎৱা ভৱন্তমভিষেকমুখোপচার -
    চর্যোৎসুকা রঘুপতে ! তৱ সুপ্রভাতম্॥ **8**॥

সীতামুখেন্দুসৱিধেঽপি সদা প্রসন্নং
    মন্দস্মিতেন মধুরং সুধযেৱ লোকৈঃ।
লংবালকালিলিলিতং তৱ ৱক্ত্রপদ্মম্
    সংশোভতাং রঘুপতে ! তৱ সুপ্রভাতম্॥ **9**॥

শ্রীকোসলেশ্ৱরপুরাকৃতভাগ্যরাশে !
    শ্রীকোসলেন্দ্রতনযানযনাভিরাম !।
সাকেতসাধুকুলকাঙ্ক্ষিতকল্পকশ্রীঃ !
    সীতামনোহরমণে ! তৱ সুপ্রভাতম্॥ **10**॥

উদ্দণ্ডশৌণ্ডভুজখণ্ডিতখণ্ডপর্শু -
    কোদণ্ডচণ্ডরৱপিণ্ডিতসাণ্ডজাণ্ড !।
কোদণ্ডদণ্ডৱরমণ্ডিতবাহুদণ্ড !
    শ্রীখণ্ডচর্চিততনো ! তৱ সুপ্রভাতম্॥ **11**॥

ইত্থং ৱেঙ্কটশেষেণ সুপ্রভাতস্তুতিঃ কৃতা।
শ্রীরামচরণাম্ভোজযুগভূষা সমর্পিতা॥ **12**॥

নীলোৎপলানি সরসীষ্ৱিহ সঙ্কুচন্তি
    সাপত্রপাণি তৱদৃগ্তুলযোর্ৱিলাসে।
ধামানি তে চ ৱিকচানি সরোরুহাণি
    শ্রীরামচন্দ্রদযিতে ! তৱ সুপ্রভাতম্॥ **13**॥

প্রাতস্সুৱর্ণমণিদর্পণনাযিকাস্য -
    ৱীক্ষাং ৱদন্তি সুধিযঃ শুভমেৱ পত্যুঃ।
সর্ৱং ৎৱদাননৱিলোকনতোঽস্য সিধ্যেৎ
    উত্তিষ্ঠ মৈথিলসুতে ! তৱ সুপ্রভাতম্॥ **14**॥

॥ ইতি শ্রীকোদণ্ডপাণিসুপ্রভাতং সমাপ্তম্॥